०. प्राचीनभारतवर्षस्य इतिहासस्य तथा संस्कृतेः पुनर्निर्माणे अभिलेखानां गुरुत्वं सम्यग् आलोच्यताम्।

उत्तरम् - प्राचीनभारतवर्षस्य इतिहासस्य तथा संस्कृतेः पुनर्निर्माणे अभिलेख-स्मारक-मुद्राणां महत्वपूर्णं स्थानमस्ति । कठिन वस्त्वुपरि उत्कीर्णत्वात् अभिलेखः सुदीर्घकालं स्थायी भवति। तालपत्र भुर्जपत्रादिषु लिखितं पुस्तकम् सहजेन क्षयं प्राप्नोति। तस्मात् अभिलेखानां गुरुत्वं समधिकम्। अभिलेखात् शुङ्ग-आन्ध्र-सातवाहन कुषाण-क्षत्रप-गुप्त वाकाटक- चालुक्य-राष्ट्रकूट- परमार-प्रतिहार चोल-पाण्ड्य-पाल-सेनादीनाम् राजवंशानाम् प्राचीनेतिहासस्य संस्कृतेश्च महत्वपूर्ण तथ्यं प्राप्यते ।

राजवंशानां विवरणम्— रुद्रदाम्नः गिरनार-अभिलेखे रुद्रदाम्ना सह तस्य पितामहस्य चष्टनः, तथा तस्य पितुः जयदाम्नः नाम अपि उत्कीर्णम्- 'तदिदं राज्ञो महाक्षत्रपस्य सुगृहीतनाम्नः स्वामिचष्टनपौत्रस्य राज्ञः क्षत्रपस्य जयदानः पुत्रस्य राज्ञो महाक्षत्रपस्य गुरुभिरभ्यस्तनाम्नो रुद्रदाम्नः--।

समुद्रगुप्तस्य प्रयागप्रशस्तौ अपि समुद्रगुप्तस्य प्रपितामहस्य श्रीगुप्तस्य, पितामहस्य घटोत्कचस्य, तस्य मातामहस्य लिच्छवेः मातुः कुमारदेव्याः च नामानि उत्कीर्णानि। स्कन्दगुप्तस्य स्तम्भाभिलेखे वंश-संस्थापकात् स्कन्दगुप्तपर्यन्तं सर्वेषां सम्राजां नामानि तथा प्रथम चन्द्रगुप्तात् प्रभृति तस्य पत्नीनां नामानि अपि उत्कीर्णानि । समुद्रगुप्तस्य पत्नी दत्तदेवी, तस्याः गर्भात् चन्द्रगुप्तः (द्वितीयः) अजायत । तस्य पत्न्याः ध्रुवदेव्याः कुमारगुप्तः, तथा कुमारगुप्तात् स्कन्दगुप्तः अजायत।

श्रीहर्षस्य बासखेडा इति ताम्रपत्रे (६२७ ख्रीष्टाब्दः) नरवर्धनात् प्रभृति तस्य पूर्वजानां, तथा तेषां पत्नीनामपि नामानि उत्कीर्णानि । इतिहासनिर्माणे अस्य गुरुत्वमनस्वीकार्यम्।

राज्ञां विजयवर्णनम् –

रुद्रदाम्नः गिरनार अभिलेखे (१५० ख्रीष्टाब्दः) स्पष्टतया उल्लिखितं यत्, रुद्रदाम्ना बहवः यौधेया उत्सादिताः, तथा दक्षिणाधिपतिः शातकर्णि अपि वारद्वयम् प्रथमं पराजितः ततः मुक्तः । समुद्रगुप्तस्य प्रयागप्रशस्तौ समुद्रगुप्तस्य दिग्विजयः सविस्तरं वर्णितः। पण्डितैः चन्द्रगुप्तस्य मेहरौली-लौहस्तम्भे उत्कीर्णः लेखः विजयस्तम्भरूपेण स्वीकृतः।

शासनबन्धः—

अशोकस्य शासने राज्ञा सह प्रजानां पितापुत्रयोः सम्बन्ध इवासीत्। जनकल्याणार्थं तेन वृक्षरोपणम्, तडाग-कूपादि-निर्माणम्, मनुष्याणां पशूनां च कृते चिकित्सा-व्यवस्थापनं कृतम्। अशोकस्य राज्ये महामात्र धर्ममहामात्र- राजुक-प्रादेशिकादीनाम् आधिकारिकाणां नियुक्तिः कृता। प्रान्तीयशासकाः राष्ट्रिक, भौगिकः, भोगपतिः, गोप्ता इत्यादिभिः नामभिः परिज्ञाताः आसन्।

तिथिक्रम- कालक्रम-निर्धारणम्-–

इतिहास-निर्माणे तिथिः संवत् च इत्येतयोः गुरुत्वमस्ति । महाकवेः कालिदासस्य भारवेश्च कालनिर्धारणे द्वितीय पुलकेशिनः ऐहोल अभिलेखस्य (६३४ खीष्टशब्द) उल्लेखः प्रामाण्यरूपेण स्वीक्रियते। अभिलेखे विक्रम संवत्, शक संवत्, गुप्त-संवत्, हर्षसंवत् इत्यादेः उल्लेखः इतिहास-निर्माणे सहायकं भवति।

भाषा लिपिश्च—

अभिलेखानां भाषा लिपिश्च उत्तरकालीनायाः भाषायाः लिपेश्च क्रमविकाश-विषये ज्ञातुं सहायका भवति। अभिलेखे प्रयुक्तायाः ब्राह्मीलिपितः देवनागरीलिपेः रूपं विकसितमिति स्वीकृतम्। अभिलेखे व्यवहृतयोः संस्कृत-प्राकृतयोः भाषयोः प्रयोगः तात्कालिक-भाषावैविध्यस्य, विकाशक्रमस्य च ज्ञाने अतीव उपयोगी।

सामाजिक-चित्रम्—

अशोकस्य अभिलेखेषु सामूहिक-परिवारप्रणाली दृश्यते। वर्णाश्रमध ब्राह्मणादि वर्णानां वर्णनं दत्तम्। तत्र कायस्थादि-जातीनामपि उल्लेखः अस्ति। अशोकः दासैः सेवकैश्च सह समुचित व्यवहार-विषये आदेशं दत्तवान्। राजा एकाधिक विवाहं कर्तुं शक्य आसीत्। मनोरञ्जनाय मृगया-संगीत-द्यूतक्रीडादीनामुल्लेखः अस्ति । पट्टवायश्रेण्याः मन्दासौर - शिलालेखे उक्तम् - स्त्रियः गृहात् बहिर्गमनकाले रेशमीवस्त्र स्वर्णहार - पुष्पमालादीनां परिधानं कुर्वन्ति स्म।

आर्थिक-स्थितिः—

अभिलेखेषु वर्णितात् भूमिदान- ग्रामदान- कूपादिनिर्माण-सेतुनिर्माणात् तथा ताम्रपट्टादिभ्यः तत्कालीनायाः समृद्धेः तथा सुदृढायाः आर्थिकव्यवस्थायाः परिचयः प्राप्यते । पट्टवायश्रेण्याः मन्दासौर-अभिलेखे सूर्यमन्दिर निर्माणम्, तस्य पुनरुद्धारः, रेशमीवस्त्रस्य विज्ञापनम्, तथा तस्य वस्त्रस्य देश-विदेशे प्रसिद्धिः उत्कृष्टायाः आर्थिक स्थितेः प्रमाणम्।

धर्मीय-अवस्था—

अभिलेखेषु विविधानां धर्म-सम्प्रदायाणामुल्लेखः प्राप्यते। अशोकस्य अभिलेखे ब्राह्मण श्रमण-आजीवकादि-धर्मसम्प्रदायानां विवरणं दृश्यते। अशोकः राष्ट्रधर्मेण सह व्यक्तिगतजीवने बौद्धधर्म स्वीकृतवान्। अभिलेखेषु धर्मीय स्वतन्त्रतायाः मनोरमं रूपं दृश्यते। गुप्तसम्राट् वैष्णवधर्मावलम्बी आसीत्। मेहरौली-लौहस्तम्भाभिलेखे राज्ञः चन्द्रस्य विष्णुध्वजस्थापनस्य वर्णमस्ति ।

अभिलेखानाम् आरम्भः सिद्धम्, ओम्, स्वस्ति, श्री इत्यादिभिः मङ्गल्यैः शब्दैः जातः । सूर्य शिब-शक्ति-गणेशादि-देवानामुल्लेखः बहुशः दृश्यते। महाराजस्य संक्षोभस्य ताम्रपट्टाभिलेखे 'ओम् नमो भगवते वासुदेवाय' इति वाक्यमुत्कीर्णम्।

साहित्यिक-गुरुत्वम्—

रुद्रदाम्नः गिरनार-अभिलेखः संस्कृत-गद्यसाहित्यस्य उत्कृष्टमुदाहरणम्। अत्र अलङ्कार रीतीनां सौन्दर्यविधायकानां गुणानां प्रयोगः कृतः -- 'स्फुट- लघु-मधुर-चित्र-कान्त-शब्द समयोदारलङ्कृतगद्यपद्य--'। समुद्रगुप्तस्य एरण-स्तम्भाभिलेखः वसन्ततिलक-छन्दसा, चन्द्रस्य मेहरौली-स्तम्भाभिलेखः शार्दूलविक्रीडित-छन्दसा विरचितः। मन्दसौरस्य पट्टवायश्रेण्याभिलेखः एकम् उपादेयं लघुकाव्यम्। अभिलेखात् हरिषेण-वत्सभट्टि-रविकीर्ति इत्यादीनां कवीनां नामानि ज्ञायन्ते।

यदि अभिलेख-स्मारक-मुद्रानामन्वेषणं पुरातत्त्वविद्भिः न कृतं तर्हि भारतम् आत्मगौरवात् वञ्चितमभवत्। उपरि उक्तानि तथ्यानि प्राचीनभारतस्य इतिहासस्य संस्कृतेश्च पुनर्निर्माणे सहायकानि भवन्ति।

-- By Sanjoy Barman